# अथ कीलकम् in Hindi

॥ अथ कीलकम् ॥
ॐ अस्य श्रीकीलकमन्त्रस्य शिव ऋषिः,अनुष्टुप् छन्दः,
श्रीमहासरस्वती देवता,श्रीजगदम्बाप्रीत्यर्थं सप्तशतीपाठाङ्गत्वेन जपे विनियोगः।

ॐ नमश्चण्डिकायै॥

मार्कण्डेय उवाच
ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे॥**1**॥

सर्वमेतद्विजानीयान्मन्त्राणामभिकीलकम्।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः॥**2**॥

सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि।
एतेन स्तुवतां देवी स्तोत्रमात्रेण सिद्ध्यति॥**3**॥

न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते।
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम्॥**4**॥

समग्राण्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम्॥**5**॥

स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः।
समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम्॥**6**॥

सोऽपि क्षेममवाप्नोति सर्वमेवं न संशयः।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः॥**7**॥

ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति।
इत्थंरुपेण कीलेन महादेवेन कीलितम्॥**8**॥

यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम्।

स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः॥**9**॥

न चैवाप्यटतस्तस्य भयं क्वापीह जायते।
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात्॥**10**॥

ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति।
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः॥**11**॥

सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम्॥**12**॥

शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत्॥**13**॥

ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः।
शत्रुहानिःपरो मोक्षः स्तूयते सा न किं जनैः॥**14**॥

## Atha Kilakam in English

**|| Ath Keelakam ||**

**Om Asya ShreekeelakaMantrasya Shiva Rishih, Anushtup Chandah,
ShreeMahaSaraswati Devata, ShreeJagadambaPreetyartham SaptashatiPathangTvena Jape Viniyogah.**

**Om Namashchandikayai ||**

**Markandeya Uvacha
Om VishuddhaJnyanaDehaya TrivediDivyaChakshushe |
ShreyahPraptiNimittaya Namah SomardhaDharine || 1 ||**

**SarvamEtatVijaniyanMantranamAbhiKeelakam |
Sopi KshemaMavapnoti Satatam JapyaTatparah || 2 ||**

**SiddhyantyUchatanaadini Vastuni SakalAnyapi |
Etena Stuvatam Devi StotraMatrena Siddhyati || 3 ||**

**Na Mantrao Naushadham Tatra Na KinchidApi Vidyate |
Vina Japyen Siddhyet SarvamUchatanaAdikam || 4 ||**

**SamagraAnyApi Siddhyanti LokaShankamImam Harah |
Kritva Nimantrayamas SarvamEvamIdam Shubham || 5 ||**

**Stotram Vai Chandikayastu Tachch Guptam Chakara Sah |
SamaptirNa Cha Punyasya Tam Yathavanniyantranam || 6 ||**

**Sopi KshemaMavapnoti Sarvamevam Na Samshayah |
Krishnayam Va ChaturdashyamAshtamyam Va Samahitah || 7 ||**

**Dadaati Pratigrihnati NaAnyathaisha Prasidati |
ItthamRupena Keelena Mahadevena Keelitam || 8 ||**

**Yo Nishkeelaam Vidhayainam Nityam Japati Samsphutam |
Sa Siddhah Sa Ganah Sopi Gandharvo Jayate Narah || 9 ||**

**Na ChaivaApyatatastasya Bhayam Kvapiha Jayate |**
**NaApamrityuvasham Yati Mruto MokshamAvapnuyat || 10 ||**

**Jnyatva Prarabhya Kurvita Na Kurvano Vinashyati |**
**Tato Jnyatvaiva Sampannamidam Prarabhyate Budhaih || 11 ||**

**Saubhagyadi Cha Yatkinchid Drishyate Lalanajane |**
**TatSarvam TatPrasadena Tena JapyaMidam Shubham || 12 ||**

**ShanaiStu JapyamaneAsmin Stotre SampattirUchchakaih |**
**BhavatyEva SamagraApi Tatah PrarabhyaMeva Tat || 13 ||**

**Aishwaryam YatPrasadena SaubhagyaArogyaSampadah |**
**Shatruhanih Paro Mokshah Stuyate Sa Na Kim Janaih || 14 ||**